पलिह्यात्। यथालाभं न्यग्रोधादित्वक् प्रवालकल्कं वा पयसा पाययेदुत्पलादिकल्कं वा कशेरुशृङ्गाटकशालूककल्कं वा शृतेन पयसोदुम्बरफलौदककन्दकाथेन वा शर्करामधुमधुरेण शालिपिष्टं न्यग्रोधादिस्वरसपरिपीतं वा वस्त्रावयवं योन्यां धारयेत् ॥*॥ अथादृष्टशोणितवेदनायां मधुकदेवदारुपयस्यासिद्धं पयः पाययेत् तदेवाश्मन्तकशतावरीपयस्यासिद्धं विदारिगन्धादिसिद्धं वा बृहतीद्वयोत्पलशतावरीसारिवापयस्यामधुकसिद्धं पयस्यार्कपुष्पीसिद्धं वा पयः पाययेदिति। एवं चिप्रमुपक्रान्ताया उपावर्त्तन्ते रुजो गर्भश्चाप्यायते। व्यवस्थिते च गर्भे गव्येनोडुम्बरशलाटुसिद्धेन पयसा भोजयेत्। अतीते लवणस्नेहवर्ज्जाभिर्यवागूभिरुद्दालकादीनां पाचनीयोपसंस्कृताभिरुपक्रमेत यावन्तो मासा गर्भस्य तावन्त्यहानि। वस्तुदरशूलेषु पुराणगुड़ं दीपनीयसंयुक्तं पाययेदरिष्टं वा वातोपद्रवगृहीतत्वात्। स्रोतसां लीयते गर्भः सोऽतिकालमवतिष्ठमानो व्यापद्यते तं मृदुना स्नेहादिक्रमेणोपचरेत्। उत्क्रोशरससंसिद्धामनल्पस्नेहां यवागूं पाययेत्। माषतिलविल्वशलाटुसिद्धान् वा कुल्माषान् भक्षयेन्मधुमाध्वीकं चानुपिबेत् सप्तरात्रम्। कालातीतस्थायिनि गर्भे विशेषतः सधान्यमुदूखलं मुषलेनाभिहन्यात् विषमे वा यानासनं सेवेत। वाताभिपन्न एव शुष्यति गर्भः। स मातुः कुक्षिं न पूरयति मन्दं स्पन्दते च तं बृंहणीयैः पयोभिर्मांसरसैश्चोपचरेत्। शुक्रशोणितं वायुनाभिप्रपन्नमवक्रान्तजीवमाध्मापयत्युदरम्। तत् कदाचित् यदृच्छयोपशान्तं नैगमेयापहृतमिति भाषन्ते। तमेव कदाचित् प्रलीयमानं नागोदरमित्याहुस्तत्रापि लीनवत् प्रतीकारः ॥*॥ अत ऊर्द्ध्वं मासानुमासिकं वक्ष्यामः।

"मधुकं शाकवीजञ्च पयस्या सुरदारु च।
अश्मन्तकस्तिलाः कृष्णास्ताम्रवल्ली शतावरी॥
वृक्षादनी पयस्या च लता चोत्पलसारि वा।
अनन्ता सारिवा रास्ना पद्मा मधुकमेव च॥
बृहत्यौ काश्मरी चापि चीरिशुङ्गास्त्वचो घृतम्।
पृश्निपर्णी बला शिग्रु श्वदंष्ट्रा मधुपर्णिका॥
शृङ्गाटकं विसं द्राक्षा कशेरु मधुकं सिताः।
वत्सैते सप्त योगाः स्युरर्द्धश्लोकसमापनाः॥
यथासंख्यं प्रयोक्तव्या गर्भस्रावे पयोयुताः।
कपित्थबृहतीविल्वपटोलेक्षुनिर्दिग्धिकाः॥
मूलानि चीरसिद्धानि पाययेद्भिषगष्टमे।
नवमे मधुकानन्तापयस्यासारिवाः पिबेत्॥
चीरं शुण्ठीपयस्याभ्यां सिद्धं स्याद्दशमे हितम्।
सचीरा वा हिता शुण्ठी मधुकं सुरदारु च।
एवमाप्याय्यते गर्भस्तीव्रा रुक् चोपशाम्यति॥"

निवृत्तप्रसवायास्तु पुनः षड्भ्यो वर्षेभ्य ऊर्द्ध्वं प्रसवमानाया नार्य्याः कुमारोऽल्पायुर्भवति॥*॥ अथ गर्भिणीं व्याध्युत्पत्तावत्यये छर्दयेन्मधुराम्लेनान्नोपहितेनानुलोमयेच्च संशमनीयञ्च मृदु विदध्यादन्नपानयोरश्नीयाच्च मृदुवीर्य्यं मधुरप्रायं गर्भाविरुद्धञ्च गर्भाविरुद्धाश्च क्रिया यथायोगं विदधीत मृदुप्रायाः ॥*॥ भवन्ति चात्र।

"सौवर्णं सुकृतं चूर्णं कुष्ठं मधु घृतञ्च वा।
मत्स्याक्षकः शङ्खपुष्पी मधु सर्पिः सकाञ्चनम्॥
अर्कपुष्पी मधु घृतं चूर्णितं कनकं वचा।
हेमचूर्णानि कैटर्य्यः श्वेता दूर्वा घृतं मधु॥
चत्वारोऽभिहिताः प्राशाः श्लोकार्द्धेषु चतुर्ष्वपि।
कुमाराणां वपुर्मेधाबलबुद्धिविवर्द्धनाः॥"

इति सुश्रुत आयुर्वेदशास्त्रे तृतीयं शारीरस्थान समाप्तम्॥ इङ्गरेजीभाषायां एनाटोमीत्युक्तमेतत् ॥*॥ शारीरं तपो यथा,—

"देवद्विजगुरुप्राज्ञपूजनं शौचमार्ज्जवम्।
ब्रह्मचर्य्यमहिंसा च शारीरं तप उच्यते॥"

इति भगवद्गीतायाम् १७ अध्यायः॥

शारीरकं, क्ली, (शरीरमेव शारीरं कुत्सितत्वात् तन्निवासी शारीरको जीवस्तमधिकृत्य कृतो ग्रन्थः। शारीरक + अण्।)वेदव्यासकृतवेदान्तमीमांसासूत्रम्। यथा। तथा च वयमस्यां शारीरकमीमांसायां प्रदर्शयिष्यामः। वेदान्तमीमांसाशास्त्रस्य व्याचिख्यासितस्येदमादिमं सूत्रम्। अथातो ब्रह्मजिज्ञासेति। इति शङ्करभाष्यम्॥ (शरीरमेव शरीरकं तत्र भवम्। शरीरक + अण्। शरीरभवे, त्रि। यथा, भागवते। ३। ३१। १८।

"पश्यत्ययं धिषणया ननु सप्तवध्रिः
शारीरके दमशरीर्य्यपरः स्वदेहे॥")

शारीरिकः, त्रि, (शरीर + ठक्।) शरीरसम्बन्धि। तत्पर्य्यायः। कालेवरिकः २ गात्रिकः ३ वापुषिकः ४ सांहननिकः ५ वार्ष्मिकः ६ वैग्रहिकः ७ कायिकः ८ दैहिकः ९ मौर्त्तिकः १० तानविकः ११। इति अमरोक्तशरीरपर्य्यायशब्दात् ष्णिकप्रत्ययेन निष्पन्नमिदम्॥

शारुकः, त्रि, (शृणातीति। शॄ + "लषपतपदस्थेति।" ३। २। १५४। इति उकञ्।) हिंसकः। शृस्थाभूकम गमेत्यादिना उकप्रत्ययेन निष्पन्नमिदम्। इति मुग्धबोधव्याकरणम्॥ (यथा, मुग्धबोधे कारकप्रकरणे।

"दृष्ट्वा दधिं शारुकमेतदर्त्तकान्
उन्नीतवन्तं यतिभिः सुदर्शनम्॥")

शार्कः, पुं, शर्करा। इति शब्दरत्नावली॥

शार्ककः, पुं, दुग्धफेनः। शर्करापिण्डम्। इति मेदिनी॥

शार्करः, पुं, दुग्धफेनः। शर्करास्त्यत्रेति। शर्करा + "देशे लुबिलचौ च।"५। २। १०५। इति अण्।) शर्करान्वितदेशः। इति मेदिनी॥ शर्करासम्बन्धिनि, त्रि॥ (शर्करेव। "शर्करादिभ्योऽण्।" ५। ३। १०७। इत्यण्। शर्करासदृशम्॥ इति काशिका॥*॥ "सिकताशर्कराभ्यां च।" ५।२।१०४। इति अणि शर्कराविशिष्टश्च॥ यथा, शार्करं मधु। इति च काशिका॥)

शार्करकः | शार्करिकः } त्रि, शर्करावहुलदेशः। शर्कराशब्दात् कण्प्रत्ययेन ष्णिकप्रत्ययेन च निष्पन्नः॥

शार्करीयः, त्रि, शर्करायुक्तदेशः। शर्कराशब्दात् छीयप्रत्ययेन निष्पन्नमिदम्॥

शार्ङ्गं, क्ली, आर्द्रकम्। इति राजनिर्घण्टः॥ (शृङ्गस्य विकारः। शृङ्ग + अण्।) विष्णुधनुः। धनुर्मात्रम्। इति मेदिनी। गे, २६॥ (यथा, रघुः। ४। ६२।

"शार्ङ्गकूजितविज्ञेयप्रतियोधे रजस्यभूत्॥")

शृङ्गसम्बन्धिनि, त्रि॥

शार्ङ्गष्टा, स्त्री, महाकरञ्जः। इति राजनिर्घण्टः॥ पुस्तकान्तरे शार्ङ्गेष्ठा इति च पाठः॥

शार्ङ्गी, [न्] पुं, (शार्ङ्गमस्यास्तीति। शार्ङ्ग + इनिः।) विष्णुः। इत्यमरः॥ (यथा, रघुः। १२। ७०।

"स सेतुं बन्धयामास प्लवगैर्लवणाम्भसि।
रसातलादिवोन्मग्नं शेषं स्वप्नाय शार्ङ्गिणः॥")

धन्विमात्रम्। इति शार्ङ्गशब्दार्थदर्शनात्॥

शार्दूलः, पुं, (शॄहिंसायाम् + "खर्ज्जिपिञ्जादिभ्य ऊरोलचौ।" उणा० ४। ९०। इति ऊलच् प्रत्ययेन साधुः।) व्याघ्रः। उत्तरपदे श्रेष्ठार्थवाचकः। इत्यमरः॥ राक्षसः। पशुभेदः। स तु सरभः। इति मेदिनी॥ पक्षिविशेषः। इति धरणिः॥ चित्रकः। इति राजनिर्घण्टः॥

शार्दूलललितं, क्ली, धृतिवृत्तौ अष्टादशाक्षरपादच्छन्दोविशेषः। यथा,—

"मः सो जः स-त-सा दिनेश ऋतुभिः शार्दूलललितम्।
कृत्वा कंसमृगे पराक्रमविधिं शार्दूलललितं
यश्चक्रे चितिभारकारिषु सुररातिष्वतिदवम्।
सन्तोषं परमन्तु देवनिवहे चैलोक्यशरणं
श्रेयो वः स तनोत्वपारमहिमा लक्ष्मीप्रियतमः॥"

इति छन्दोमञ्जरी २ स्तवकः॥

शार्दूलवाहनः, पुं, पञ्चविंशतिपूर्व्वजिनान्तर्गतजिनविशेषः। इति त्रिकाण्डशेषः॥

शार्दूलविक्रीड़ितं, क्ली, अतिधृतिवृत्तौ ऊनविंशतिपादच्छन्दोविशेषः। यथा,—

"सूर्य्याश्वैर्म-स-ज-स्त-ताः सगुरवः शार्दूलविक्रीड़ितम्।
गोविन्दं प्रणमोत्तमाङ्ग रसने त्वं घोषयाहर्निशं
पाणी पूजयतं मनः स्मर पदे तस्यालय गच्छतम्।
एवञ्चेत् कुरुताखिलं मम हितं शीर्षादयस्तद्ध्रुवं
न प्रेक्षे भवतां कृते भवमहाशार्दूलविक्रीड़ितम्॥"

इति छन्दोमञ्जरी २ स्तवकः॥